This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ श्रीधर्मचारक्रमेणशुद्धमनसिज्ञानेन
दृश्येतदेतारंव्यनियंमचिंयकल्पममलंप्राप्यंहिसर्वास्पदं॥
यत्तद्ब्रह्मनिरंजनंविजयेततस्यानुवृत्तंसदंतर्ध्यानसुखा
नुभूतिमभयंचिद्विस्तृतंशाश्वतं॥१॥मायाकार्यदेहत्र
येचापरजीवेऽहंधीरासीयत्कृपेक्षामृतवृष्ट्या॥यास्ता
नश्येद्ब्रह्माहंखलुनियतःस्यांतंवैवंदेऽहंहरिनारायण
मीड्यं॥२॥सोंतर्यामीगुरुस्वामीसच्चिदानंदरूपवान्॥ रामः

स्थापितया एतत्किंकरनिर्दिष्टदेहोपैहितयाधियाग्रश॥आचार्यपं
चश्लोकानांव्याख्यानंकारयंतु॥न्यूनंयत्साधवस्तद्वि
प्रयत्नंनस्तयया॥४॥वेदोनित्यमधीयतांतदुदितंक
र्मस्वनुष्ठीयतांतेनेशस्यविधीयतामपचितिःकाम्ये
मनिस्यज्यतां॥पापौघःपरिधूयतांभवसुखेदोषा
नुसंधीयतामात्मेच्छाव्यवसीयतांनिजगृहात्तूर्णंवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्गम्यतां १ संगः सत्सु विधीयतां भगवतो भक्तिर्दृढाधी
यतां शांत्यादिः परिचीयतां दृढतरं कर्माशु संत्यज्यतां सद्वि
द्वानुपसर्पतामनुदिनं तत्पादुके सेव्यतां ब्रह्मैकाक्षरमर्थ्य
तां श्रुतिशिरोवाक्यं समाकर्ण्यतां २ वाक्यार्थस्य विचार्य
तां श्रुतिशिरःपक्षः समाश्रीयतां दुस्तर्कात्सुविरम्यतां श्रु
तिमतस्तर्कोनुसंधीयतां ब्रह्मास्मीति विभाव्यतामहरहो
गर्वं परित्यज्यतां देहोहं मतिरुत्स्यतां बुधजनैर्वादः समु
त्सृज्यतां ३ क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौ

रामः
२

षधं भुज्यतां स्वाद्वन्नेन हि यत्नतां विधिवशात्प्राप्तेन संतुष्यतां ॥
शीतोष्णादि विषह्यतां न च वृथा वाक्यं समुच्चार्यतामौदासिन्यम
भीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यतां ४ एकांते सुखमास्यतां
परतरे चेतः समाधीयतां पूर्णात्मा सुसमीक्षतां जगदिदं तद्बा
धितं दृश्यतां ॥ प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः
श्लिष्यतां प्रारब्धं त्विह भुज्यतामथ परं ब्रह्मात्मनास्थीयतां ५
अथ मूलज्ञानेन जीवदेहाभिमानिनोऽस्य जनस्य स्वात्मनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संस्थाप्रतिपादनाययान्युपनिषद्वाक्यानीश्वरेणतत्सूचनार्थं
ब्रह्मसूत्राणिश्रीमत्कृष्णद्वैपायनोक्तानितत्सिद्धांतंपरम
कारुणिकोभगवान्भाष्यकारःसंप्रदायानुसारेणकथयति॥
ज्ञानादेवतुकैवल्यमितिश्रुतेः॥ ज्ञानप्रतिपादकेवेदांतशा
स्त्रेऽनुबंधचतुष्टयमुक्तं॥अधिकारी १ विषयः २ संबधः ३ प्र
योजनं ४ तत्रअधिकारीतुविधिवदधीतवेदवेदांगत्वेनापात
किंचिदंशेन तोअधिगताखिलवेदार्थोऽस्मिन्जन्मनिजन्मांतरेवाकाम्य रामः ३

निषिद्धवर्जनपुरःसरंनित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठाने
अत्यंत ननिर्गतनिखिलकल्मषतयानितांतंनिर्मलस्वांतःसाधनचतु
ष्टयसंपन्नःप्रमताऽधिकारी॥विषयोजीवब्रह्मैक्यंशुद्धचैतन्यं
प्रमेयं।सर्ववेदांतानांतात्पर्यात्॥संबंधस्तुतदैक्यप्रमेयस्यतत्प्र
त्प्रतिपादकोपनिषत्प्रमाणस्यबोध्यबोधकभावः॥प्रयोजनं
तुतदैक्यप्रमेयगताज्ञाननिवृत्तिःस्वस्वरूपानंदावाप्तिश्च॥
अधिकारिणोनिरूपयति॥ वेदोनित्यमधीयतां जात

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मात्रोऋषिदेवपितृणामृणीभवति। तत्र प्रथमाश्रमे द्वादशवर्षं
ब्रह्मचर्यं चरेदिति व्रतबंधानांतरं गुरुकुलेवसन् मुंजिपाला
शदंडाजिनधारी केशश्मश्रुनखकृतं नरहितो धौतवासा माधुक
रीभिक्षां गुरुं निवेद्य तयैवोदरभरणं कृत्वा त्यक्ताष्टांगमैथुनः
सांगं सप्तसंस्थात्मकं वेदमधीयात्। तत्र दशग्रंथाः। संहिता १
ब्राह्मणं २ अरण्यं ३ निघंटः ४ शिक्षा ५ कल्पः ६ व्याकरणं ७
निरुक्तं ८ छंदः ९ ज्योतिषं १०। अथ सप्तसंस्था। संहिता १ पदं २ रामः
४

क्रमः ३ जटा ४ शिखा ५ माला ६ घनः ७ एवं व्रती ब्रह्मचारी विधि
वत्कृताध्यायन ऋषिऋणाद्विमुच्यते। तथा यदुक्तं श्रीमद्भागव
ते त्रैलोक्यगुरुणा श्रीकृष्णेन। अथानंतरमावेक्ष्यन् यथाजिज्ञा
सितागमः। गुरवे दक्षिणां दत्वा स्नायाद्गुर्वनुमोदितः। गृहं वनं
चोपविशेत्प्रव्रजेद्वा द्विजोत्तमः। आश्रमादाश्रमं गच्छेन्नान्यथा
मत्परश्चरेत्। गृहार्थी सदृशीं भार्यामुद्वहेदजुगुप्सितां। यवीयसीं
कनिष्ठं
केचिद्विप्राः समाचरंतीति श्रूयते। अन्येषु देशेषु लक्षणमपि
तु वयसायां सवर्णामनुक्रमात्। विधिवदाश्रमधर्माः कलावशक्याः। तथापि द्रविडेषु १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नजानंति। क्रियायाः किंप्रयोजनं। यदहरेव विरजेत्तदहरेव प्र
व्रजेदिति श्रुतेः। तस्मिन्नेवं आश्रमे वैराग्यं जातं चेत्संन्यास एव
कार्यः। निर्वेदश्चेद्वनमुपविशेत्। विषयासक्तमनास्तु समावर्त्त
नं कृत्वा सदृशीं भार्यां परिणीय द्वितीयो गृहस्थाश्रमः कार्यः।
कलौ विधिवत्प्रथमाश्रमोऽशक्य एव। अतः मूलवाक्यानुवृत्त्या
वेदाध्ययनं कृत्वा तदुदितमनुष्ठानं समाचरेत्॥ ॥तदुदितं
कर्मस्वनुष्ठीयतां॥ ॥तत्र नित्यनैमित्तप्रायश्चित्तकाम्यनि

रामः
५

षिद्धानि पंचविधानि कर्माणि। प्रातरेव स्नायादिति सूत्रं। जातपु
त्रोऽग्नीनादधीतेति श्रुतेः। जातस्य लक्षणं। पुत्रोत्पादने सामर्थ्यं
जातं चेत्। प्रातः कालात्तु शौचं स्नानं द्वे संध्ये कालद्वये होमः स्वा
ध्यायः देवभूतपितृयज्ञो वैश्वदेवः अतिथिपूजनं मनुष्ययज्ञः
अनागतेऽतिथौ समये षोडशग्रासपरिमितान्नत्यागः सनका
दिभ्यो मनेष्येभ्यः। एवं पंचमहायज्ञाः। एतैः कर्मभिरतः रि
क्तकाले शास्त्रपुराणावलोकनं यथान्हिकं दर्शपूर्णमासेष्टिआ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रयणं चातुर्मास्यं एतत्सर्वं नित्यं। पुत्रजन्मानुबंधीनि जातेष्ट्यादी
नि सत्राणि चयनानि च वापीकूपतडागारामधर्मशालापूर्त्तानि
नैमित्तानि। पवित्रातिपवित्रेष्ट्यादीनि प्रायश्चित्ता[illegible]॥ ज्यो
तिष्टोमेन स्वर्गकामो यजेतेति श्रुतेः। ज्योतिष्टोमादीनि काम्या
नि। सेनयागादीनि निषिद्धानि। काम्यनिषिद्धेत्यक्त्वा त्रीणि
कर्माणि समाचरेत्। विधिवत्कलावशक्यत्वात्तंद्रावित्तशाठ्यं
वर्जयित्वा पूर्वोक्तैः कृतैः कर्मभिर्देवऋणाद्विमुच्यते। तथा

नि

रामः

प्रारब्धवशात्पुत्रोत्पादनेन च पिंडपितृयज्ञपित्रेष्टिषण्णवतिती
र्थक्षेत्रोपरागगयाश्राद्धादिभिः पितृऋणाद्विमुच्यते। अने
न कर्मणेश्वराराधनं भवतीत्यभिप्रायः॥ ॥तेनेशस्य विधी
यतामपचितिः॥ ननु गंधपुष्पादिना पूजा प्रसिद्धा कर्मणा
कथं प्रसज्जते चेत्। यज्ञो वै विष्णुरिति श्रुतेः। स्वकर्मणा तम
भ्यर्च्य सिद्धिं विंदति मानवः इति स्मृतेश्च संघटते। कर्मणि कृ
ते॥ ॥काम्ये मतिस्त्यज्यतां॥ ॥अहो काम्यानि कर्माणि पू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्वमेवत्यक्तानिपुनरुक्तिः कस्माच्चेत्तर्हिसस्वरूपस्त्यागकृतोत्रफ
लत्यागोविधेयः कर्मत्रयेअग्नेरहंदेवयज्ययाचक्षुभान्भूयास
मित्यादीनिश्रुतयोवदंति।एतत्फलानुसंधानंजह्यात्।ननुत्य
कर्मासक्तिः
क्तेफलानुसंधानेकैकप्रसक्तिः कस्माच्चेत्तर्हिईश्वराज्ञया।भीषा
स्माद्वातःपवतेभीषोदेतिसूर्यः इतिश्रुतेः।यदुक्तंसर्वेश्वरेणगी
तासु।तस्मात्सर्वगतंब्रह्मनित्यंयज्ञेप्रतिष्ठित।एवंप्रवर्त्तितंच
क्रंनानुवर्त्तयतीहयः।अघायुरिंद्रियारामोमोघंपार्थसजीव
रामः
७

ति।अथानंतरंकिंकर्त्तव्यं।जिज्ञासुनाकृच्छ्रचांद्रायणादीनिव्र
तानितथातीर्थक्षेत्राटनदेशेकालेचपात्रेचदानंपर्वकालेस्नान
त्यागादिभिः॥ ॥पापौघःपरिधूयतां॥ तमेतंब्राह्मणावि
विदिषंतिदानेनतपसानाशकेनेत्यादिश्रुतेः।यज्ञोदानंतपः
कर्मपावनानिमनिषिणामितिस्मृतेश्च।एभिःकर्मतपोभिः
शुद्धेमनसिसाधनचतुष्टयमपेक्षितंतत्रादौवैराग्यं॥ ॥
भवसुखेदोषोनुसंधीयतां॥ ॥तद्वैराग्यंत्रिविधं।मंदंतीव्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ उदारता

त्यक्तुमिच्छ्य

तीव्रतरं चेति। दोषदृष्टिर्जिहासा च पुनर्भोगेषूदीनता। देवति
र्यङ्नरेष्वेवं सुखमक्षजसंज्ञिकं। श्वविट्समानं जानाति वै
राग्यं प्राप्तवान् परं। जातवैराग्ये नित्यानित्यवस्तुविवेकः।
॥ ॥आत्मेच्छा व्यवसीयतां॥ ज्ञानभूमी शुभेच्छाख्या प्रथ
मा परिकल्पिता। विचारणा द्वितीया तृतीया तनुमानसा।
सत्वापत्तिश्चतुर्थी स्यात्ततः संसक्तिनामिका। पदार्थाभा
वना षष्ठी सप्तमी तुर्यगा स्मृतेति योगवासिष्ठे। विवेकेन

रामः
८

ब्रह्मसत्यं जगन्मिथ्यां ज्ञाते च पूर्वसुकृतानुसारेण समूल
वासनाक्षयमनोजयौ स्यातां चेत्संन्यास एव विधेयः। नो
चेदपक्वकषायस्य तृतीयो वानप्रस्थाश्रमः॥ निजगृहा
त्तूर्णं विनिर्गम्यतां॥ यथाकारागृहात्कश्चिद्रक्षकादवस
रं लब्ध्वा सत्वरं निर्गच्छति तथा पुत्रादिकुटुंबत्यक्त्वा वने वा
नप्रस्थं कुर्यात्तत्तु कलौ कुत्रापि न श्रूयते। अतस्तदाचारले
खने वृथा प्रयासो ज्ञातः। गमनं द्विविधं। स्वरूपतः अनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सक्तितः। गृहपुत्रादीस्त्यक्त्वा किं असंगत्वमाचरेत्। नहि।
अपक्वकषायानां केवलमसंगत्वमशक्यं। अतएव॥ ॥संगः
सत्सु विधीयतां॥ ॥संसारेस्मिन्क्षणार्द्धोपि सत्संगः शेव
धिर्नृणामिति श्रीमद्भागवते॥ किंलक्षणाः सन्तः। सर्वभूतेषु
यः पश्येद्भगवद्भावमात्मनः। भूतानि भगवत्यात्मन्येष भागव
तोत्तमः। सदा संतोभिगंतव्या यद्यप्युपदिशंति नो। या हि स्वैर
कथास्तेषामुपदेशा भवंति ताः इति योगवाशिष्ठे॥ तत्र गत्वा किं रामः

किं कर्त्तव्यं॥ ॥भगवतो भक्तिर्दृढा धीयतां॥ ॥भक्तिस्तु द्वि
विधा। नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा॥ नीवारशु
कवत्तन्वी पीता भास्वत्यणूपमा। तस्याः शिखायामध्ये परमा
त्मा समाहित इति श्रुत्योक्त्या शांडिल्यदीक्षया दहराकाशद्यु
पासना। भजसेवायां धातौ। भजतेऽसौ भक्तः। सा भक्तिर्नव
विधा। श्रवनं। ननु कर्मणा चित्तशुद्धिः। चित्तशुद्धिद्वारा मोक्षो
त्र भक्तेरपेक्षा नास्ति इति चेत्तर्हि एष सर्वेश्वर इति श्रुतेः। दैवी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यंते मायामेतां
तरंति ते इति स्मृतेश्च। चित्ते शुद्धौ चेतसः स्थैर्यकार्ये ज्ञानोत्प
त्तौ चाह कांडत्रयं यावदिति वाक्यात् भक्तेरपेक्षैव कर्मज्ञानांग
त्वात्। यदुक्तं श्रीभागवते॥ यर्ह्यब्जनाभ चरणैशनयोरुभ
क्त्या चेतोमलानि विधमेद्गुणकर्मजानि। तस्मिन् विशुद्ध उप
लभ्यत आत्मतत्त्वं साक्षाद्यथामलदृशौ सवितृप्रकाशः॥ ॥
श्रवणं॥ यदुक्तं भगवता श्रीकृष्णेन। तावत्कर्माणि कुर्वीत न रामः
७

निर्विद्येत यावता। मत्कथाश्रवणादौ वा यावच्छ्रद्धा न जायते। त
ल्लक्षणं। हित्वा तंद्राप्रमादीन् देहयात्राय दृच्छया। लब्धवान्
सकृद्गाथाश्रवणैकपरो भवेत्॥ कीर्त्तनं। नामगुणकीर्त्तनं
कलावति प्रशस्तं। मर्त्ता अमर्त्यस्य ते भूरिनाम मनामहे। विप्रासो
जातवेदस इति श्रुतेः। ध्यायकृते यजन् यज्ञैस्त्रेतायां द्वापारेऽर्च
यन्। यदाप्नोति कलौ संकीर्त्य केशवमिति वाक्यात्। तल्लक्षणं
यदुक्तं श्रीमद्भागवते। शृण्वन् सुभद्राणि रथांगपाणेर्जन्मानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्माणि च यानि लोके। गीतानि नामानि तदर्थकानि गायन्विल
ज्जो विचरेदसंगः। एवं व्रतः सन् प्रियनामकीर्त्या जातानुरागो द्र
तचित्त उच्चैः। हसत्यथ रोदति रौति गायन् उन्मादवन्नृत्यति लो
कबाह्यः। विष्णुस्मरणलक्षणं। वेष्टयतीति विष्णुः व्यापकत्वात्
स्मरणं चेतसो धर्मः सर्वत्र तद्व्यापकानुसंधानं। पुरुष एवेदं सर्वं
यद्भूतं यच्च भव्यमिति श्रुतेः॥ वनानि विष्णुर्गिरयश्च विष्णुर्भूता
नि विष्णुर्हि दिशश्च विष्णुः॥ खं वायुमग्निः सलिलं मही च यज्जा रामः

तमात्रं सकलार्थविष्णुरिति॥ पादसेवनलक्षणं इदं विष्णुर्वि
चक्रमे त्रेधा निदधे पदमिति श्रुतेः। यदुक्तं भागवते। त्रिभुव
नविभवहेतवेप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात्।
न चलति भगवत्पदारविंदाल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः॥
एवं सदैव तत्पदानुसंधानं॥ अर्चनलक्षणं। नित्यं यथाद्रव्यला
भे वा मानसोपचारैः पुरुषसूक्तषोडशऋग्भिः त्रिकालपूजनं
कुर्यात्। वेदोक्तमेव कुर्वाणो निःसंगोर्पितमीश्वरे। नैष्कर्म्यां ल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेसिद्धिमितिस्मृतेः ॥ निरूपाधिकतयामानसप्रज्ञाप्रशस्ता ॥
॥ वंदनलक्षणं ॥ रंवायुमग्निंसलिलंमहींचज्योतींषिसर्वाणि
दिशोद्रुमादीन् ॥ सरित्समुद्राश्चहरेः शरीरंयत्किंचभूतंप्रणमेद
नन्यः ॥ विसृज्यमानयमानान्स्वांस्त्यजन्त्रीडांस्वदेतिकोऽप्रणमेद्ब
द्धमानवचोंऽजलंगरुत्र ॥ यत्रयत्रेवमनोमरीयंतत्रेवतत्रेव
नवस्यरूपंयत्रेवयत्रेवशिरोमरीयंतत्रेवतत्रेवपरइयंतेइतिसदे
वभावना ॥ ॥ दास्यलक्षणं ॥ प्रतिमागारमार्जनलेपनादीन्गुरुस रामः
ज्जनार्जवंयदुक्तंश्रिकृष्णेनासुश्रूषमाणआचार्यमुपासीतनी १२

चवत् ॥ यानशय्यासनस्थोनैर्नातिदूरेकृतांजलिः ॥ कस्मिंश्चित्समये
श्रीरामचंद्रेणमारुतिः पृष्टः ॥ कस्त्वं ॥ तेनोत्तरंदत्तं ॥ देहभावत्वदासो
हंजीवभावात्त्वदंशकः ॥ ॥ आत्मभावात्त्वमेवाहमितिमेनिश्चितामति
तिः ॥ ॥ सख्यलक्षणं ॥ ॥ जीवेश्वरयोः सखित्वंतथाकिंचिज्ञसर्वज्ञ
त्वाभ्यांलघुत्वगुरुत्वमपिसहजं ॥ ॥ द्वासुपर्णासयुजासखायाइति
श्रुतेः ॥ ॥ सखेतिमत्वाप्रसभंयदुक्तंहेकृष्णहेयादवहेसखेति ॥ अस्मि
न्श्लोकार्द्धैः सखित्वसुखंअर्जुनंप्रतिभगवतोवचनं ॥ तेवेदंमयाप्रोक्तं
लयेनवापि ॥ अस्मिन्गुरुलघुत्वंनारायणावतारः श्रीकृष्णोनरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वतारोअर्ज्जुनउक्तलक्षणेनपरस्परसंबंधः॥उक्तंमहामुद्गलभट्टैः॥
त्वयिविमुखेमखमुख्येसख्येनान्यस्यकस्यचिज्जीवामि।जीवामि
तभवदर्पितवसनाशनमात्रजीवनाःसर्वे॥ आत्मनिवेदनलक्ष
णं॥कायेनवाचामनसेंद्रियैर्वाबुध्यात्मनावानुसृतस्वभावात्॥
करोमियद्यत्सकलंपरस्मैनारायणायतिसमर्पयेतत्॥यदुक्तंव
सिष्ठसंहितायां॥ शिवंसर्वगतंशांतंबोधात्मकमखंडितं॥तदे
कभावनंरामसर्वत्यागइतिस्मृतः॥एवंअव्यभिचारिण्यादृढ रामः
१३

याभक्त्याचित्तस्थैर्यशमादिषट्कंप्रवर्त्तते॥शांत्यादिःपरिचीयतां॥
॥शमोदमस्तितिक्षोपरतिःश्रद्धासमाधानं॥उत्पन्नवासनात्या
गोशमोयंपरिकल्पितः॥१॥सर्वेंद्रियप्रवृत्तीनानिग्रहोदमउच्यते॥२॥
सुखदुःखादिद्वंद्वानांसहनंसातितिक्षका॥३॥संसारोद्योगशैथि
ल्यंचित्तादुपरमःस्मृतः॥४॥गुरुवेदांतवाक्येषुविश्वासोदृढनि
श्चयः॥श्रद्धासापरमैःपुण्यैर्लभ्यार्यैःसंप्रकीर्त्तिता॥५॥मनसो
वृत्तिविक्षेपात्स्थिरतायासदाभवेत्॥समाधानंपरंत्विष्टंसाधक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्याप्रयत्नतः ॥६॥ एवं कर्मोपासनासाधानत्रयानंतरं स्वयमे
वमुमुक्षता भवति। संसार। बंधनिर्मुक्तिः कदास्यान्मे कदा
विधे। इति यासु दृढा बुद्धिर्वक्तव्या सा मुमुक्षतेति॥ जाता
यां मुमुक्षुतायां॥ ॥ कर्माशु संत्यज्यतां॥ ॥ न कर्मणा न
प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति श्रुतेः॥ त्या
गस्तु द्विविधः। स्वरूपतः फलतश्चेति। आदौ स्वरूप उच्यते॥
यदुक्तं श्रीकृष्णेन। इष्ट्वा यथोपदेशं मां दत्वा सर्वस्वमृत्विजे॥ राम
१४

अग्निन् स्वप्राण आवेश्य निरपेक्षः परिव्रजेत्। कर्मणि त्या
गे चतुर्थाश्रम एव विहितो अतः। सद्विद्वानुपसर्पतां॥ ॥
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमाचार्यं पश्यदिति श्रुतेः॥
सद्विद्वांसं गत्वा किं कर्तव्यं॥ ॥ तत्पादुके सेव्यतां॥ ॥ तद्वि
द्धि प्रणिपातेन परिप्रश्नेन सेवया॥ उपदेक्ष्यंति ते ज्ञानं ज्ञा
निनस्तत्वदर्शिन इति स्मृतेः॥ सेवा प्रणिपातादुपरि॥ ॥
ब्रह्मैकाक्षरमर्थ्यतां॥ अधीहि भगवो ब्रह्मेति इति श्रुतेः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिष्यस्तेऽशाधिमां प्रपन्नमिति स्मृतेश्च। संन्यासस्तु द्विविधः॥ ॥
विविदिषा [illegible] विद्वच्च। विविदिषासंन्यासो वा भूत
कूटीचकबहूदकहंसाख्याः। सांप्रतं विविदिषासंन्यास एव कथ्य
ते। प्रेषोच्चारप्रणवोपदेशानंतरं। तस्मै सद्विद्वानुपसन्नाय प्राहे
ति श्रुतेः॥ तत्त्वमसीमहावाक्योपदेशः॥ ॥श्रुतिशिरोवाक्यं स
माकर्ण्यतां॥ ॥महावाक्यं श्रुत्वापि कदाचित्प्रमातुरननुभवे वि
धिवत्पूर्वसाधनासंभवान्मनोजयः सम्यक् न स्यात् तथा प्रज्ञामां रामः
१५

द्यादिचत्वारः प्रतिबंधाः स्युः श्चेत् तर्हि जीवन्मुक्तेरनुभूतिर्न सिध्य
ति। तत्सिध्यर्थमादौ मनोजये योगाभ्यास उचितः॥ यदुक्तं योग
शो वासिष्ठे। तत्त्वज्ञानं मनोनाशो वासनाक्षय इत्यपि। युगपत्तृतीभ्या एकस्मि
न्काले
साज्जीवन्मुक्तो न संशयः। आदौ यमनियमप्रत्याहारसनप्राणायाम
ध्यानधारणादिभिरभ्यासः। योगश्चित्तवृत्तिनिरोध इति पातांज
लिसूत्रं॥ मनसो दशवृत्तयः। कामः संकल्पो विचिकित्सा श्रद्धाऽश्र
द्धा धृतिरधृतिर्ह्रीर्धीर्भीः। सर्वं मन एव॥ वृत्तिनिरोधेन मनोजयः॥
प्रज्ञामांश्चेत् आवृत्तिरसकृदुपदेशादिति ब्रह्मसूत्रं। असकृद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यारोपापवादाभ्यां दशोपनिषद्भाष्यं तथा शारीरभाष्यार्थविचारः ॥
॥ वाक्यार्थश्च विचार्यतां ॥ ॥ अध्यारोपः । दृष्टांतेन यथा असर्परज्जौ
भ्रमेण सर्पारोपस्तथा द्राष्टांते निःप्रपंचे वस्तुनि सच्चिदानंदाद्वय आ
त्मनि अज्ञानशक्तिद्वयेन प्रथमया स्वरूपावरणं द्वितीयया प्रपंचस्य
निक्षेपो दृष्टत्वादाकाशप्रभृतिजो देह आत्माहमिति ॥ अज्ञानं तु स
दसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभावरूपं यत्किंचि
दिति वदंति । अहमज्ञस्यनुभावात् । देवात्मशक्तिः स्वगुणैर्निगूढा रामः
१५

मित्यादिश्रुतेः ॥ अज्ञानं । माया । प्रधानं । अविद्या । प्रकृतिः । व्यष्टिसम
ष्ट्यभिप्रायेण एकमनेकमिव व्यपह्रीयते । अधिष्ठानसत्यतया । इंद्रं
मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद्विप्रा
बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुरिति श्रुतेः ॥ अपवादः ॥ दृ
ष्टांते यथा रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववत्तथा द्राष्टांते वस्तुविव
र्त्तस्य वस्तुनोऽज्ञानादेः प्रपंचस्य वस्तुमात्रत्वं । यथा दृष्टांते केनचिद्वि
भ्रमचक्षुषा रज्जुद्रष्टॄणां सर्पो भोगासंभवान्नास्ति रज्जुरेव निर्दिष्ट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्पभोगवाच्यांशत्यागे रज्जुरेव दृश्यते तथैव द्राष्टांते सद्गुरुकृपा
वशादुपनिषच्छास्त्रविचारेण व्यसमष्ट्योरसज्जडदुःखरूपप्रपं
च भागवाच्यांसत्यागेन लक्ष्यांशं शुद्धचैतन्यमभिन्नं स[illegible]दात्मकं
सिद्धं। ब्रह्मविदाप्नोति परं सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः॥ वाक्या
र्थविचारानंतरं किं कृत्यं॥ ॥श्रुतिशिरःपक्षः समाश्रीयतां॥ ॥
अज्ञानादिभूतकार्यपंचकोशवाच्यांशत्यागेन यल्लक्ष्यांशं शुद्धचैत
न्यं सच्चिदाख्यं तदहं ब्रह्मास्मीति दृढनिश्चयः॥ यो वेद निहितं गुहा

चि

रामः
१५

यामिति श्रुतेः। असकृद्वा सकृदुपनिषच्छास्त्रोक्तिभिर्वाक्यार्थवि
चारेण गते प्रज्ञामांद्ये च प्रपंचमिथ्यापरिज्ञाते पि दृश्यमानत्वाद्वर्त्त
मान इवाहं लक्ष्यांशं शुद्धचैतन्यं भवामि वा न भवामि। इति कुतर्क
प्रतिबंधश्चेन्मननेन॥ ॥दुस्तर्कात्सुविरम्यतां॥ ॥युक्तिभिरनु
चिंतनं मननं। तत्किंभूतमक्षायां लक्षणमुच्यते। उपनिषच्छास्त्रे आ
त्मा पंचकोशातिरिक्तः शुद्धसंपादितः स कथं अनुभूयात्॥ अत्र स
र्वेषां स्वत एव युक्तितोऽनुभवः। पंचीकृतान्नमयकोशभोगायतन
स्थूलदेहस्य गोलकद्वारा इंद्रियव्यापारैः जागृदवस्था विश्वाभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानिभ्यांचअपंचिकृतप्राणमयमनोमयविज्ञानमयकोशत्रय
सप्तदशकलात्मकभोगसाधनसूक्ष्मदेहस्यगोलकैर्विनामन
सैवेंद्रियव्यापारैःस्वप्नावस्थातैजसाभिमानिभ्यांसहलयेप्रपं
लयप्राप्नो ति चसुखदुःखादिद्वंद्वंतिरोभवति।सुषुप्त्यवस्थाभिमानीप्राज्ञआ
नंदमयकोशेकारणदेहेकरणैर्विनाअज्ञानजंसुखमनुभवति।
युक्तं एवंचेत्तर्हिचैतन्यंकारणदेहोपहितंकिं।नहिसुषुप्त्यवस्थालये
प्राज्ञःअज्ञानसुखेनसहतिरोभूत्वास्थूलदेहेगोलकद्वाराइं रामः
१८

द्रियव्यापारैःप्रपंचस्यसुखदुःखादिद्वंद्वंजागृदवस्थाभिमानी
विश्वोनुभवति।एवंपरस्परंतिरोभावाविर्भावाभ्यांविलक्षणं
शुद्धचैतन्यंदेहवस्थाभिमानीत्रयविलक्षणंसत्समाधौअव
स्थात्रयरहितेअहमस्मीतिसदिंद्रियाधिष्ठातृदेवताभ्यांवि
नास्वयंप्रकाशमानत्वाच्चित्सुखमस्यात्मनोरूपमितिवाक्यात्
स्वरूपाविर्भावआनंदएवसच्चिदानंदरूपंसर्वावस्थास्वनुवृ
त्तंप्रतीयते।।यदाऽवस्थात्रयरहितमुक्तंतत्कथमनुवृत्तंस्याच्चे युक्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तर्हि जाग्रदवस्थायां सर्वमस्ति। किंतु अज्ञानशक्तिद्वयात्पूर्वं। स
देव सौम्येदमग्र आसीदिति श्रुतेः॥ अधिष्ठानसत्यतया विक्षेपो
स्तीति प्रतीयते इति सत्प्रत्ययः। यस्य भासा जगद्भाति तमेव भां
तमनुभाति सर्वमिति श्रुतेः॥ अधिष्ठानप्रकाशमानतया विक्षे
पो भासते इति चित्प्रत्ययः। तस्यैवानंदस्य मात्रामुपजीवंतीति
श्रुतेः। सर्वविषयग्रहणपुत्रदारादीष्टप्राप्तिसुखं आनंदप्रत्ययः॥
स्वप्नावस्थायामपि मनःसंकल्पेन सच्चिदानंदानुभवः। तथैव

रामः
१९

सुषुप्तौ। अत्र दृष्टांतः। यथा मृगजलं नास्त्येव सूर्यांशौ दृष्टिविपर्या
सेन दृष्टे मृगजलेपि परस्परसलक्षणत्वं न घटते किंतु सूर्यांश
वः ऊर्ध्वगाः सत्याः मृगजलमधो दृष्टं अनया लक्षणया सूर्यांशवो
मृगजलाद्विलक्षणाः परंतु सूर्यांश्वधिष्ठानेन मृगजलं दृष्टं तद
स्ति भाति प्रियांशत्रयेण इदमपि तद्वत्तत्कालपरिमितनिश्चितं अ
वर्त्तनं नेन लक्षणेन मृगजलसूर्यांश्वनुवृत्तिः॥ तथा द्राष्टांतेपि अज्ञानका
र्याद्विलक्षणमधिष्ठानतयानुवृत्तं सच्चिदानंदाख्यं शुद्धचैतन्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धं ॥ एवं युक्तिभिर्मननेन कुतर्कं विहाय तत्स्थाने । श्रुतिम
तस्तर्कोनुसंधीयतां ॥ ॥ उक्तलक्षणं शुद्धचैतन्यमेवाहमिति
निश्चयः कार्यः ॥ प्रपंचे देहे वर्त्तमानात् कदाचित्स्वरूपाननुसंधा
ने विपर्ययदुराग्रहश्चेत् ॥ ॥ ब्रह्मास्मीति विभाव्यतां ॥ ॥ प्रार
ब्धवशात्प्रपंचे वर्त्तमानः सन् सर्वं भूतकार्यं अज्ञानजं त्यक्त्वा शुद्ध
चैतन्यमहमूलवाक्योक्त्या सदैव निदिध्यासनं कुर्यात् । उदरमंतरं
कुरुते ऽथ तस्य भयं भवंतीति श्रुतेः ॥ तत्ववित्तु महाबाहो गुणकर्म रामः
२०

विभागयोः ॥ गुणा गुणेषु वर्त्तंते इति मत्वा न सज्जते इति स्मृते
श्च ॥ ॥ उक्तं चानुभवादर्शे ॥ असोः क्षुत्पिपासे धियः शोकमोहौ
जरामृत्यरोगाः शरीरस्य जन्म ॥ अवस्थासु षुप्त्यादयो या धियस्ताः
समस्ता अहं निर्विकारोऽस्मि शांतः ॥ यदि अहं ब्रह्मनिष्ठ इतरेन
सत्येवं वृत्तौ व्याप्तिश्चेत् ॥ ॥ अहरहो गर्वः परित्यज्यतां ॥ ॥ गर्व
रहितेन निदिध्यासनेन ॥ ॥ देहोऽहं मतिरुत्स्यतां ॥ ॥ देहोस्मीति
विपर्ययदुराग्रहस्त्याज्यः ॥ गुरुवेदांतात्मप्रत्यये सिद्धे इदं शास्त्रम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमाक्षेपरति॥ ॥बुधजनेर्वादस्मुत्सृज्यतां॥ ॥अहोवादेवा
दजायतेतत्वबोधारतद्वाक्यादपेक्ष्यः एवंहि किंनुमननात्पू
र्वंवादोयुक्तः। सिद्धेप्रत्ययेनापेक्षते। तमेकमात्मानंमवजानीथ
अन्यावाचोविमुंचथेतिश्रुतेः॥ अनादिप्रपंचेमस्तीकेदेहयात्रा
पिसमाप्तावाकिंनहि कस्माद्देहस्यभोगपर्यवसानंविद्यते
क्षुद्व्याधिश्चचिकित्स्यतां॥ क्षुद्व्याधिनिर्देशः कस्मादुपयुक्तश्चै
नहि प्राणोन्नलेतिव्यजानादितिश्रुतेः। क्षुधयाप्राणेवैकल्प रामः
२७

व्याधिरिवअतएवउक्तनिर्देशोबलीयान्। यदाकदाचिद्दहनि
मध्यान्हादुपरिक्षुत्समयआलोचनीयः। नात्यन्ततस्तुयोगोस्ति
नचेकांतमनश्रुतरितिस्मृतेः॥ अन्नेक्षुद्व्याधौ।भिक्षौषधंभु
ज्यतां॥ ॥अन्नंब्रह्मेतिव्यजानात्रितिश्रुतेः। अन्नेनप्राणपुष्टि
स्तेनसाधनंसुकरंभिक्षायाऔषधनिर्देशः कस्माच्चतत्पुष्टि
स्तदात्मवादिनांविहिता। प्रत्यगात्मप्रतीतिसिद्धानांधारणा
मात्रंयथाचऔषधेनप्रमादःअल्पेनानेकल्पंतथाकरणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रादिनारम्यास्निग्धास्थिराहृद्याआहारासात्विकप्रियाइतिस्मृ
तेः॥सात्विकअहारपरिमितमौषधमिवसेवेत्॥उक्ताहारेणप्राण
नेष्वलेनसंतोषस्तेनसाधनंसुकरंयदुक्तंयोगशास्त्रेद्वौभागौप्र
रयदन्नैर्जलेनैकंचप्ररयेत्॥वायुप्रसरणायचतुर्थमवशेषयेत्॥
तीव्रवैराग्यबलात्॥॥स्वादन्नेनहियत्नतः॥॥स्पष्टंकेनचिन्नृ
हमेधिनाभक्तितःस्वादन्नंसमर्पितंनेत्॥॥विधिवशात्सात्मेन
संतुष्यतां॥॥कस्मात्तवलुस्वान्नेषु॥कट्वाम्ललवणात्युष्णतीक्ष्णरूक्ष रामः

२२

क्षविदाहिनः॥आहाराराजसस्येष्टादुःखशोकामयप्रदाइतिस्मृतेः॥
संतोषसंग्रहणंस्यात्॥ग्रहणेनवानप्रकोपउदरादयःस्युः
अतस्तेषामाहारादीनांमध्येसात्विकान्नंहैयंग्राह्यंतेनवानप्रको पियं
पस्तंद्रानभवति॥अहारयाचनेनविनाऽन्यद्याचनंमाभूदितिप्रि
प्रायेण॥॥शीतोष्णादिविषयतां॥॥युक्तंश्रीमद्भागवते॥चीरा
णिकिंपथिनसंतिदिशंतिभिक्षांनेवांघ्रिपाःपरभृतःसरितोप्य
शुष्यन्॥रुद्धागुहाःकिमजितोवतिनोपसन्नान्कस्माद्भजंतिकवयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दां

धनदुर्मदांधान् इति॥ प्रलापोनर्थकं वच एतदभिप्रायेण। न च वृथावाक्यं
समुच्चार्यतां॥ ॥ मौनं चैवास्मि गुह्यानामिति स्मृतेः॥ पंचमीभूमिकारुरु
क्षूणां॥ ॥औदासीन्यमभीप्स्यतां॥ ॥कुत्रापि संसक्तिर्न विधेया। प्रागा
श्रमे कस्योपरि कृपा कृता उत्तरकाले निदिध्यासनसमये तद्ध्यानमेव भ
वति एवंभूतप्रतिबंधः कस्योपरि क्रोधः कृतः स पुनः प्रतिकारं करि
ष्यतीति चिंतनं भावी प्रतिबंधः उभयोर्निवारणार्थं॥ ॥जनकृपानैष्ठुर्य
मुत्सृज्यतां॥ ॥स्पष्टं॥ असंसक्तनामिका पंचमीभूमिकारूढेन किं कर्त्त
व्यं। एकांते सुखमस्यताम्॥ ॥ननु तच्चिंतनं तत्कथनं परस्परनि रामः

२३

बोधनमिति वाक्यात् द्वाभ्यामपि ब्रह्माभ्याससुखप्रसक्तिर्जायते॥
न हि तत्सरस्परनिबोधनात्सुखं चतुर्षु भूमिकासु गृह्यते॥ पंचम्या अर्वा
क् एक एव परो ह्यात्मा सच्चिदानंदविग्रहे इति वाक्यादेकांत एव सुखं
स्यात्। द्वितीयाद्वै भयं भवतीति श्रुतेः॥ विविक्तसेवी लघ्वाशी यतवा
क्कायमानसः॥ ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रित इति स्मृतेः॥
केन प्रकारेण सुखमश्नीयात्॥ ॥परतरे चेतः समाधीयतां॥ ॥
ननु देहाभिमाने गलिते विज्ञाते परमात्मनि॥ यत्र यत्र मनो याति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रतत्रसमाधयइतिवाक्यात्विविक्तसेवनादेःकिंप्रयोजनंचे
त्तर्हितदपियुक्तंपरंतुदृष्टदुःखस्यरूपतस्तिरोभूत्वाजीवन्मु
क्तदशासुखंसमाधिंविनानानुभूयतेआनंदमनोध्यासादि
त्तिब्रह्मसूत्रं॥षष्ठभूमिकारतक्षोःसमाधिर्यावच्चक्यमुचि
तमेवास्तुद्विविधः॥सात्मज्ञानादिविकल्पलयानपेक्षया
अद्वितीयवस्तुनितदाकारतायास्थित्तवृत्तेरवस्थानंसंप्रज्ञा
तःप्रथमः॥द्वितीयोज्ञात्मज्ञानादिविकल्पलयापेक्षयाअ

द्वितीयवस्तुनितदाकाराकारितायास्थित्तवृत्तेरतितरामेकीभा
वेनावस्थानमसंप्रज्ञातःयदुक्तंयोगशास्त्रेमनसोवृत्तिशू
न्यब्रह्माकारतयास्थितिःयासंप्रज्ञातनामासोसमाधिरभिधी
यते॥जीवन्मुक्तदशायाद्वावेवभवतः॥एवंसमाधिना॥ ॥
प्रणत्मासुसमीक्षतां॥एकमेवाद्वितीयंब्रह्मनेतनानास्तिकिंच
नेतिश्रुतेः॥सुस्थितेसमाधौद्वितीयंप्रपञ्चमानस्यात्तर्हि॥ ॥जग
द्विरैतद्वाधितंदृश्यतां॥वाचारंभणंविकारोनामधेयंमृत्तिके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यवसप्तमितिश्रुतेः वर्त्तमाने देहे अवश्यमेव भोक्तव्यं कृतकर्मशु
भाशुभमितिवाक्यात्संचितक्रियमाणप्रारब्धकर्मणां का वा
गतिः॥ ॥प्राक्कर्मप्रविलाप्यतां॥ अज्ञानादिदेहत्रयाद्विल
क्षणं शुद्धचैतन्यमेवाहमेवं प्रत्ययो यदा जातस्तदैव संचितं न
ष्टं। किंतु भोगायतनस्थूलशरीरभोगसाधनसूक्ष्मशरीराभ्यां
विना भोगो न संभवति। भोगायतनं तत्कालसंबंधिमृत्तं अ
स्तु तेन किं तत्संधिभोगसाधनं शरीरं विद्यते यदा कदाचिद्भो रामः

२५

गायतनं पुनः संपाद्य भोक्तव्यं चेत्तर्हि दैशिकोपदेशेन श्रवणम
ननादिभिस्तद्विविक्तं प्रत्यगात्मशुद्धचैतन्यमहमित्यनुभावा
च्चिज्जडग्रंथिभेदो जातः। भिद्यते हृदयग्रंथिश्छिद्यंते सर्व
संशयाः। क्षियते चास्य कर्माणि तस्मिन् दृष्टे परे वरे इति स्मृ
तेः। चिज्जडग्रंथिं विना भोगायतनशरीरोत्पत्तिर्नास्ति। तथैव॥
॥चितिबलान्नाप्युत्तरैः श्लिष्यतां॥ ॥देहत्रयादिविलक्षणः
प्रत्यगात्मा शुद्धचैतन्यमहमित्यनुभवाद्वर्त्तमानदेहजेक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्मणि असंगत्वाज्जन्माभावः। असंगो ह्ययं पुरुष इति श्रुतेः। क्रि
यमाणं केन भोक्तव्यं। संचितक्रियमाणयोर्नष्टयोः प्रारब्धं कथं
न नश्येत्तर्हि आत्मनः संचितादित्रयं नास्त्यवसुतराम् एतत्त्रयं
देहसंबंधि संचितसंबंधिदेहो नष्टः क्रियमाणदेहासंभवः
प्रारब्धसंबंधिस्थूलदेहे वर्त्तमाने॥ ॥ प्रारब्धं त्विह भुज्यतां॥
प्रारब्धकर्मणां भोगादेव क्षय इति वाक्यात्स्पष्टं। निर्वासनो
निरालंबः स्वच्छंदो मुक्तबंधनः। क्षिप्तसंस्कारवातेन चेष्ट

रामः
२९

ते शुष्कपर्णवत्। प्रारब्धं चतुर्विधं। ब्रह्मविद्वरवर्याणवरिष्ठलिं
गतारतम्येन भज्यते। ब्रह्मवित्स्वेच्छपरेच्छानिच्छसुखदुःखैः प्रार
ब्धत्रयमपि वर्णाश्रमधर्मानाचरन् सन् भुनक्ति। वरस्तु देहया
त्रामात्रं स्वेच्छप्रारब्धं भुनक्ति। वर्याणपरेणान्येन शुभाशुभ
मस्योपरिकृतं तत्परेच्छप्रारब्धं भुनक्ति। वरिष्ठः परकृतेपीच्छा
मकुर्वन् असंप्रज्ञातसमाधिबलादनेच्छप्रारब्धं भुनक्ति। एव
मुक्तचिन्हैर्वर्त्तमानशरीरायुःक्षयपर्यंतं॥ ॥ ब्रह्मात्मनास्थी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतां। सर्वं खल्विदं ब्रह्मेति श्रुतेः। ब्रह्मविद्ब्रह्मैव भवति न तस्य
प्राणा उत्क्रमंति अत्रैव समविलीयंते इति श्रुतेः। विद्वत्संन्यास
स्तु साधनचतुष्टयादुपरि श्रवणादित्रयसमाधिद्वयसिद्धे सन्य
सेत्। अयं याज्ञवल्क्यः संपादयामास। फलतस्त्यागसंन्यासौ
तु अध्ययनकर्मोपासनासाधनचतुष्टयैः शुद्धमनसि महावा
क्यश्रवणादित्रयाणामपरोक्षसाक्षात्कारेपि लोकसंग्रहार्थं
वर्णाश्रमधर्मानाचरति। अनाश्रितः कर्मफलं कार्यं कर्म करो

रामः
२५

ति यः। स संन्यासी च योगी च न निरग्निर्न चाक्रियः इति स्मृतेः। उक्तल
प्राकव्य क्षणाविर्भावे यथेष्टाचरणं माभूत् स्वत एव अद्वेष्टृत्वादयो गुणा उप
तिष्ठंति। बुध्वाद्वैतं स्वतत्त्वस्य यथेष्टाचरणं यदि। शूनां तत्त्वदृशां चै
व को भेदोऽशुचिभक्षणे॥१॥ उक्तं च तस्माद्यथिष्टाचरणं न कुर्या
त् अस्ति चेत् ज्ञानविपाकतां॥ इति श्रीमत्परमहंसपरिव्राजका
चार्यविरचितं श्रीमच्छंकराचार्यपंचरत्नभाष्यं समाप्तं॥ ॥
इदं ग्रंथराघोगंगाधरेन स्वार्थं परोपकारार्थं लिख्यते॥ हस्ताक्षर ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीपंचरत्नभाष्यसमाप्तः ॥ ६० ॥ दीनानाथपाठकस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=24.07.19 10:26
,TRANSFERRED=2019/07/24 at 10:34:25
,PAGES=30
,TYPE=STD
,NAME=S0001093
,Book Name=M-1946-PANCHRATAN BHASHYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection